श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

विल्लूर् नडादूर् श्री श्रीनिधिस्वामि विरचितः

# ॥ यादवाद्रिस्तुतिः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ यादवाद्रिस्तुतिः ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

आनन्दपूर्णोऽस्मि न च श्रमो मे
 पापानि सर्वाणि विनाशितानि।
स्वयं प्रसन्नो यदुभूधरेन्दुः
 संपत्कुमारो यदयं नतोऽद्य॥ १ ॥

संपत्कुमारं सकलाभिवन्द्यं सद्भिस्समास्वादितपादपद्मम्।
नत्वा यदुक्ष्माधरमौलिभागे स्थितोऽस्म्यहं नन्दथुमौलिभागे॥ २ ॥

सीतां लब्धुमतीव पूर्वमभवन् पृथ्वीधरा वानरैः
 नीता वारिनिधिं ततश्च महितं प्रापुर्यशश्शाश्वतम्।
तेभ्योऽप्यभ्यधिकोयदुक्षितिधरस्सोऽयं यदस्मिन् पुनः
 सीतानायक एष तादृशधनुष्कोटिं पुराऽदर्शयत्॥ ३ ॥

जयतु जयतु भूमिस्सर्वसारैकभूमिः
 जयतु जयतु तस्यां यादवाद्रीन्द्रमूर्तिः।
जयतु जयतु तस्यां पाठशालापिसेयं
 जयतु जयतु तस्यां भारतीनृत्तलीला॥ ४ ॥

भूमौ को नु सतां प्रतीपकरणे बद्धादरो वर्तते
 सद्यस्तं प्लुतमारचय्य निरसुं कर्तास्म्यहं किं न्विति।
श्रीमद्यादवभूधराग्रभुवि सः श्रीमानृकण्ठीरवः
 गम्भीराकृतिराश्रितेष्टफलदः जागर्ति योगासने॥ ५ ॥

॥ इति यादवाद्रिस्तुतिः समाप्तः ॥

www.prapatti.com